International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(5): 228-231
© 2026 IJMH
www.themultijournal.com

Received: 29-09-2026
Accepted: 22-10-2026
Publish : 23-10-2026

शिवम दुबे
शोधार्थी,ज्योतिषविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

शोधमार्गदर्शकः-
प्रो.परमानन्दभारद्वाजः
ज्योतिषविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

Correspondence:
शिवम दुबे
शोधार्थी,ज्योतिषविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

ग्रहनक्षत्रगोचरः वित्तीयविपण्याश्च प्रभावः

शिवम दुबे, प्रो.परमानन्दभारद्वाजः

शोधसारः- भारतीयज्योतिषशास्त्रं केवलं जातकविचारस्याथवा व्यक्तिजीवनफलादेशस्य शास्त्रं नास्त्यपितु तत्र राष्ट्रजीवनस्य ऋतुपरिवर्तनस्य वृष्टेः कृषेः धान्योत्पादनस्य वाणिज्यस्य वस्तुमूल्यानाञ्च विचारोऽपि विस्तरेण प्राप्यते। प्राचीनज्योतिषग्रन्थेषु ग्रहाणां विशिष्टनक्षत्रेषु सञ्चारस्याधारेण लोकस्थितेस्तथा विविधवस्तूनां मूल्यपरिवर्तनस्य फलानि निरूपितानि सन्ति। प्रस्तुतशोधलेखे मङ्गलबुधगुरुशुक्राणां सप्तविंशतिनक्षत्रेषु सञ्चारसम्बद्धानि फलान्याधारत्वेन स्वीकृत्य तेषामाधुनिकांशविपण्यया सह सम्भाव्यसम्बन्धस्समीक्ष्यते। अत्र विशेषतः धान्यानां, धातूनां, सुवर्णरजतयोः कार्पासस्य तैलस्य गुडस्य वस्त्राणां च मूल्यवृद्धि-मूल्यह्राससम्बद्धाः निर्देशाः विचारिताः। एतेषामेव निर्देशानामाधुनिकविस्ताररूपेणांशविपण्याः विविधक्षेत्राण्यपि विवेचनविषयत्वेन स्वीकृतानि। तथापि ग्रहगोचरफलानि प्रत्यक्षतयांशमूल्यानि निर्णीयन्तीति निष्कर्षः न क्रियते। अपि तु पारम्परिकज्योतिषीयमान्यतानां व्यवस्थिताध्ययनस्यैतिहासिकतुलनायाः, सांख्यिकीयपरीक्षणस्य च आवश्यकता प्रतिपाद्यते। अस्याध्ययनस्य प्रमुखोद्देश्यं ज्योतिषपरम्परायाः आर्थिकचिन्तनात्मकपक्षस्य परिचयः, ग्रहनक्षत्रफलानां वर्गीकरणमाधुनिकवित्तीयव्यवस्थायां तेषां सम्भाव्योपयोगस्य मर्यादा-निर्धारणं चास्ति।

कूटशब्दाः- भारतीयज्योतिषम्, ग्रहगोचरः, नक्षत्रफलम्, मङ्गलः, बुधः, बृहस्पतिः, शुक्रः, अंशविपणिः, वस्तुमूल्यम्, मूल्यवृद्धिः, मूल्यह्रासः, वित्तीयज्योतिषम्, निवेशमनोविज्ञानम्।

शोधप्रविधिः- अस्मिन् शोधकार्ये मुख्यतया ग्रन्थाधारितविश्लेषणात्मकपद्धतिस्तुलनात्मकपद्धतिः, विषयवर्गीकरणपद्धतिश्चानुसृताः। वर्षप्रबोधः, भविष्यफलभास्करः, अर्घमार्तण्डः, तेजीमन्दीविज्ञानम् इत्यादिषु ग्रन्थेषूपलब्धानां ग्रहनक्षत्रसम्बद्धानां फलवर्णनानां सङ्ग्रहः कृतः। ततः मङ्गलबुधगुरुशुक्राणां नक्षत्रगोचरफलानि पृथक्पृथक् वर्गीकृत्य तेषु वर्णितानां मूल्यवृद्धि-मूल्यह्रास-स्थिरता-अस्थिरतादीनां प्रवृत्तीनां तुलनात्मकमध्ययनं विहितम्। आधुनिकांशविपण्याः सन्दर्भे एतेषां पारम्परिकनिर्देशानां परीक्षणाय ऐतिहासिकमूल्यदत्तांशाः, दैनिकव्यापारविवरणानि निफ्टी-पञ्चाशत्-सूचकाङ्कस्य परिवर्तनानि, विभिन्नक्षेत्रीयसूचकाङ्काः वस्तुविपण्याः मूल्यपरिवर्तनानि चोपयोगिनः स्युः। तथापि प्रस्तुतलेखः मुख्यतः ग्रन्थाधारितः सैद्धान्तिकविमर्शः अस्ति; अत्र स्वतन्त्रं सांख्यिकीयपरीक्षणं न कृतम् । अतः प्रतिपादिताः सम्बन्धाः परीक्षणयोग्याः परिकल्पनाः एव, न तु सिद्धाः निवेशसूत्राणि ।

भूमिका- भारतीयज्ञानपरम्परायां ज्योतिषशास्त्रस्य विशिष्टं स्थानं विद्यते । वेदाङ्गेषु परिगणितमिदं शास्त्रं कालज्ञानस्य, ग्रहगतिनिर्णयस्य, ऋतुविभागस्य तथा विविधलौकिकघटनानां फलविचारस्य महत्त्वपूर्णमाध्यमत्वेन प्रतिष्ठितम्। अस्य शास्त्रस्य संहितास्कन्धे राष्ट्रफलम्, वृष्टिविचारः, धान्यसम्पत्तिः, दुर्भिक्षम्, सुभिक्षम्, राजकीयस्थितिः, व्यापारः, वस्तुमूल्यानि च विवेचितानि सन्ति। प्राचीनभारतीयसमाजस्य अर्थव्यवस्था कृषिप्रधानाऽऽसीत्। अतः वर्षा, धान्योत्पादनम्, पशुसम्पत्, धातुमूल्यम्, वस्त्रव्यापारः तथा वाणिज्यस्य स्थितिः जनजीवनस्य समृद्धिं निर्धारयन्ति स्म। एतादृशे सामाजिकार्थिकपरिप्रेक्ष्ये ग्रहाणां नक्षत्रेषु सञ्चारस्य फलानि निरूपयितुं ज्योतिषाचार्यैः प्रयत्नः कृतः। तत्र

मङ्गलादिग्रहाणां विशिष्टनक्षत्रस्थितेः आधारेण कस्यचित् पदार्थस्य मूल्यवृद्धिः, अन्यस्य मूल्यह्रासः, क्वचित् विपण्याः स्थिरता, अन्यत्र चास्थिरता भविष्यतीति वर्णितम्।

आधुनिककाले अर्थव्यवस्थायाः स्वरूपं परिवर्तितम्। कृषिव्यापारस्य सहैव औद्योगिकक्षेत्रम्, सेवाक्षेत्रम्, प्रौद्योगिकी, वित्तीयसंस्थाः, देशीयान्ताराष्ट्रीयपूञ्जीविपण्यश्च आर्थिकव्यवस्थायाः प्रमुखाङ्गानि जातानि। विशेषतः अंशविपण्यां निफ्टी-पञ्चाशत्-सूचकाङ्कः भारतीयपूञ्जीविपण्याः प्रमुखं मापकत्वेन व्यवह्रियते। अतः प्राचीन-ज्योतिषग्रन्थेषु वर्णितानां मूल्यपरिवर्तनसम्बद्धानां फलानामाधुनिकवित्तीयविपण्यया सह तुलनात्मकमध्ययनमतीवमहत्त्वपूर्णः अन्तर्विषयकः शोधविषयः भवितुमर्हति।

विषयविवेचनम्- ग्रहगोचरः तथा आर्थिकफलविचारयन् प्रतिपादितम् यत् ज्योतिषीयपरम्परायां ग्रहगोचरस्य फलनिर्णये ग्रहस्वभावः, नक्षत्रस्वरूपम्, ग्रहस्य स्थितिः, कालविशेषः तथा अन्यग्रहसम्बन्धाः विचार्यन्ते। प्रस्तुतसन्दर्भग्रन्थेषु मङ्गल-बुध-गुरु-शुक्राणां नक्षत्रगोचरफलानि विशेषतया व्यापारिकदृष्ट्या उपादेयानि सन्ति। तत्र धान्यम्, कार्पासः, तिलः, तैलम्, घृतम्, गुडः, लवणम्, सुवर्णम्, रजतम्, विविधधातवः, वस्त्राणि च मूल्यविचारस्य विषयाः भवन्ति। अद्यतनविपण्यामेतेषां पदार्थानां स्थानं वस्तुविपण्यां दृश्यते। एतेषां मूल्यपरिवर्तनानि कृषिक्षेत्रस्य, औद्योगिकक्षेत्रस्य, निर्यातस्य, आयातस्य तथा उपभोक्तृव्ययस्य स्थितिं प्रभावितुं शक्नुवन्ति। अतो ज्योतिषग्रन्थेषु वर्णितः वस्तुमूल्यविचारः तत्कालीनार्थव्यवस्थायाः अध्ययनायापि महत्त्वपूर्णः अस्ति।

मङ्गलग्रहस्य नक्षत्रगोचरस्तथा विपणिः- मङ्गलस्य नक्षत्रगोचरफलानि वर्षप्रबोधभविष्यफलभास्करार्घमार्तण्डतेजीम-न्दीविज्ञानादिग्रन्थेषु विस्तरेण निरूपितानि सन्ति। अश्विनीनक्षत्रे मङ्गलस्य सञ्चारे शीतपीडा, धान्यानां मूल्यवृद्धिः, रजतस्य मूल्यह्रासश्च निर्दिष्टः। भरणी-कृत्तिकयोः धान्यानां तथा विविध-वस्तूनां मूल्यवृद्धिः वर्णिता। कृत्तिकायान्तु प्रारम्भिकवृद्ध्यनन्तरं मन्देस्सम्भावना प्रतिपादिता। वर्षप्रबोधग्रन्थे अश्विनीनक्षत्रस्थमङ्ग-लस्य फलमुक्तम्-

शीतपीडाश्विनीभौमे तुषधान्यमहर्घता।
द्विजपीडाभरण्यादेर्नाशः स्यादतिशीघ्रगे।।[1]

रोहिणीनक्षत्रे कार्पासस्य, वस्त्राणां, सूत्रस्य च मूल्यवृद्धिः, वृक्षाणां पशूनां च पीडा च उक्ता। तदुक्तं भविष्यफलभास्करे-

वृक्षपीडा श्वापदानां रोगः स्याद्रोहिणीकुजे।
महर्घताऽपि कार्पासे वस्त्रे सूत्रे विशेषतः।।[2]

मृगशिरसि सामान्यविपण्यां मन्दी, किन्तु कार्पास-रजत-तिलादीनां मूल्येषु परिवर्तनस्य विशेषः निर्देशः प्राप्यते। आर्द्रायां विपण्याः प्रवृत्तिः मूल्यवृद्ध्यभिमुखी, रजतस्य तु मन्दी इति वर्णनम् अस्ति। पुष्ये रजत-कार्पासयोः मूल्यवृद्धिः, सुवर्णस्य ततोऽधिकवृद्धिश्च निर्दिष्टा। अनुराधा-मूल-पूर्वाभाद्रपदा-उत्तराभाद्रपदानक्षत्रेषु सामान्यतः मूल्यवृद्धेः प्रवृत्तिः वर्णिता। ज्येष्ठायां न्यूनवृष्टिः, रजते मन्दी, अफीमस्य मूल्यवृद्धिश्च प्रतिपादिता। धनिष्ठायां धान्यानां मूल्यह्रासः, धातूनां मूल्यवृद्धिश्च निर्दिष्टा। रेवत्यां रजतस्य विशेषवृद्धिः, सुवर्णस्य तुलनया न्यूनवृद्धिः, धान्यानां मन्दी तथा अंशक्षेत्रेषु अस्थिरता वर्णिता। पूर्वाफाल्गुन्यां भौमस्य फलविषये वर्षप्रबोधे कथितम्-

पैत्र्येन वृष्टिस्तिलमाषमुद्गविनाशनं दुर्लभतान्यधान्ये ।
स्याद्योनिजे चेत्क्षितिजेऽल्पवृष्टिः प्रजासु पीडा गुरुतैलमूल्यम् ।।[3]

अत्र तिल-माष-मुद्गादीनां विनाशः, अन्यधान्यानाम् अलभ्यता, अल्पवृष्टिः, गुरुतैलस्य मूल्यवृद्धिश्च प्रतिपादिता। अतः तैलबीजानि, खाद्यतैलानि, दलहनानि तथा कृष्याधारितोद्योगाः अस्य गोचरविचारे विशेषेण परिगणनीयाः। एतेषां फलानां सम्यगवलोकनेन ज्ञायते यत् मङ्गलस्य गोचरफलवर्णने सर्वत्र एकरूपा मूल्यप्रवृत्तिः न प्रतिपादिता। क्वचित् सामान्यवृद्धिः, क्वचित् विशिष्टवस्तूनां वृद्धिरन्यत्र च वृद्धिमन्द्योः क्रमिकपरिवर्तनं दृश्यते।

बुधग्रहस्य नक्षत्रगोचरः तथा व्यापारिकस्थितिः-

बुधः परम्परया वाणिज्यस्य, गणनायाः, बुद्धेः, व्यवहारस्य च कारकत्वेन निरूप्यते। प्रस्तुतग्रन्थेषु बुधस्य नक्षत्रगोचरफलानि विपण्या उत्थानपतनस्य दृष्ट्या महत्त्वपूर्णानि सन्ति।

अश्विनीनक्षत्रे बुधस्य सञ्चारे गोधूमयवादीनां मूल्यवृद्धिः, इक्षुदुग्धघृतादीनां मूल्यह्रासश्च निर्दिष्टः। भरण्यामष्टदिनाभ्यन्तरे मूल्यवृद्धेः प्रवृत्तिः कथिता। कृत्तिकायां विपण्यामस्थिरता, धान्यानां प्रथमं मूल्यह्रासः ततः मूल्यवृद्धिश्च वर्णिता। रोहिण्यां धान्यानां तथा धातूनां मूल्यवृद्धिः, दलहनानां पश्चान्मन्दी, ऊर्णवस्त्राणां रेशमीवस्त्राणां च मूल्यह्रासः प्रतिपादितः।

मृगशिरसि सामान्यतः मन्दी, कार्पासस्य तु मूल्यवृद्धिः; आर्द्रायां प्रायः मन्दी; पुनर्वसावाष्टदिनाभ्यन्तरे विपण्यां मन्दीति फलानि निर्दिष्टानि। पुष्ये सामान्यवृद्धिः, किन्तु धातूनां मन्दी, रत्नानामूर्णवस्त्राणां च मूल्यवृद्धिः कथिता। आश्लेषायां विपण्यां तथा अंशक्षेत्रेषु वृद्धेः प्रवृत्तिः वर्णिता। मघायां प्रजाभयेन सह मूल्यवृद्धेः निर्देशः अस्ति। मघानक्षत्रे बुधस्य गोचरे वर्षप्रबोधे संक्षेपेण फलमाह ग्रन्थकृता- मघाबुधेऽल्पवृष्टिश्च तुषधान्यनाशः प्रजाभयम्।।[4]

हस्ते सुभिक्षकारणात् मन्दी, चित्रायामल्पवृष्ट्या सह सीमिता मूल्यवृद्धिः, स्वातौ कार्पासस्य मन्दी, विशाखायां विपण्यामस्थिरता च वर्णिता। अनुराधायां धान्यानां मूल्यस्थिरता, धातूनामन्यवस्तूनां च मन्दी प्रतिपादिता। रेवत्यां केसरकुङ्कुममजीठादीनां मूल्यवृद्धिः, तैलतिलहनगुडखाण्डरजतानां मूल्यह्रासश्चोक्तः।

एतेन बुधगोचरफलविचारे मूल्यपरिवर्तनस्य कालमर्यादा, वस्तुविशेषः तथा विपण्याः स्थिरतास्थितिश्च विशेषतया विचारिते इति ज्ञायते।

बृहस्पतेः नक्षत्रगोचरः आर्थिकसमृद्धिश्च- बृहस्पतेः गोचरफलानि सुभिक्षदुर्भिक्षवृष्टिधान्यसम्पदां च सन्दर्भे विशेषमहत्त्वं धारयन्ति।

अश्विनीनक्षत्रे बृहस्पतेः सञ्चारे सुभिक्षं धान्यसम्पत्तिश्च प्रतिपादितं, तेन विपण्यां मन्देः सम्भावना वर्णिता। भरण्यां धातूनां, रक्तवर्णवस्तूनां, धान्यानां, लाक्षायाः, चर्मणश्च मूल्यह्रासः निर्दिष्टः। मृगशिरा-आर्द्रयोः बृहस्पतिगोचरस्य फलमुच्यते-

मृगशीर्षे तथार्द्रायां यदि तिष्ठेद्बृहस्पतिः।
सुभिक्षं लभते सौख्यं वृष्टिजातं सदा जनः।।[5]

कृत्तिका-रोहिण्योः मध्यमवृष्टिः तथा मध्यमसस्योत्पत्तिः वर्णिता। रोहिण्यां बृहस्पतेः विभिन्नचरणेषु भिन्नानि फलानि कथितानि। द्वितीयचरणे अष्टादशदिनाभ्यन्तरे रत्नधान्यरजतानां मूल्यवृद्धिः, तृतीयचरणे सामान्यविपण्यां वृद्धिः, चतुर्थचरणे मन्दीति निर्देशः विशेषेणोल्लेखनीयः।

मृगशिरसि सुभिक्षं सुखं वृष्टिश्च प्रतिपादितानि, तथापि तण्डुलरजतघृतादीनां मन्दी वर्णिता। पुनर्वसौ दुर्भिक्षस्य सम्भावना, धान्यानां मूल्यवृद्धिः, रजतकार्पासयोर्मन्दी च निर्दिष्टा। पुष्य-आश्लेषयोः विपण्यां मूल्यवृद्धेः प्रवृत्तिः कथिता। मघापूर्वाफाल्गुन्योस्सुभिक्षकारणात् धातुधान्यादीनां मूल्यह्रासः प्रतिपादितः। तदुक्तञ्च-

मघायां पूर्वफाल्गुन्यां यदि तिष्ठेद्बृहस्पतिः।
सुभिक्षं क्षेममारोग्यं देशयोगं बहूदकम्।।[6]

विशाखायां धान्यानां मूल्यवृद्धिः, कार्पासस्य मन्दी, अनुराधायां सुभिक्षसहितमन्दी, ज्येष्ठायां वर्षासम्बन्धी परिवर्तनानि तथा रजतस्य मन्दी च वर्णितानि।पूर्वाषाढोत्तराषाढाश्रवणधनिष्ठा-शतभिषासु प्रायः सुभिक्षस्य तथा विपण्यां मन्देः निर्देशाः प्राप्यन्ते। रेवत्यां धान्यानां मन्दी, धातूनां प्रथमं मन्दी ततः मूल्यवृद्धिश्च कथिता। अत्र बृहस्पतिगोचरस्य फलविचारे वृष्टिः, सस्योत्पादनं, सुभिक्षदुर्भिक्षयोः स्थितिस्तथा वस्तुमूल्यानां सम्बन्धः प्रमुखतया प्रतिपादितः।

<u>शुक्रग्रहस्य नक्षत्रगोचरः तथा वस्तुविपणिः-</u> शुक्रस्य गोचरफलानि वस्तुविशेषाणां मूल्यपरिवर्तनस्य दृष्ट्या उल्लेखनीयानि सन्ति। अश्विन्यां शुक्रस्य सञ्चारे धान्यतिलतिलहनदलहनकार्पासूर्णादीनां मूल्यह्रासः कथितः। भरण्यां तदनुरूपा मन्दी निर्दिष्टा। कृत्तिकायां सामान्यतः मूल्यवृद्धिः, हिङ्ग्वादीनां तु मन्दी, रोहिण्यां सामान्यविपण्यां मन्दी, अफीमस्य मूल्यवृद्धिश्च वर्णिता। वर्षप्रबोधे अश्विनीभरणीनक्षत्रयोः शुक्रगोचरस्य प्रयोजनमाह-

शुक्रेश्विन्यां ब्राह्मणजातिविरोधो यवास्तिलमाषाः।
स्वल्पा भरण्यां संस्थेस्तुषधान्यमहर्घता चलितनाशः।।[7]

मृगशिरसि धान्यभूषादीनां मन्दी, गुडखाण्डादीनां मूल्यवृद्धि, आर्द्रायां सुभिक्षकारणात् सामान्यविपण्यां मन्दी प्रतिपादिता। पुनर्वसौ धान्यानां मूल्यवृद्धिः, कार्पास-सुवर्ण-रजत-सूत्रादीनां मन्दी च निर्दिष्टा। तदत्र शुक्रस्य गोचरफलम्-

रौद्रेऽल्पवृष्टिरन्नमधौः सुखं नश्यति विशेषात्।
पुष्यदुर्भिक्षभयं चौराः सार्पे नववर्षा स्यात्।।[8]

पुष्ये धान्यकार्पासरेशमसूत्रादीनां मूल्यवृद्धिरन्यवस्तूनां मन्दी च वर्णिता। मघायां पशूनां पीडया सह धान्यानां मूल्यवृद्धिः, पूर्वाफाल्गुन्यां धान्यानां मन्दी, उत्तराफाल्गुन्यां दुर्भिक्षकारणात् मूल्यवृद्धिश्च कथिता। हस्ते धान्यानां मन्दी तथा शर्करादीनां मूल्यवृद्धिः, चित्रायां वस्तुमूल्यानां स्थिरता, स्वातौ धान्यानां मन्दी तथा मिष्ठान्नानां मूल्यवृद्धिः निर्दिष्टा।

विशाखायां सुभिक्षकारणात् धान्य-कार्पासयोर्मन्दी, अनुराधायां सामान्यविपण्यां मन्दी, मूलनक्षत्रे धान्यानां मूल्यवृद्धिश्च वर्णिता। पूर्वाषाढायां जलजन्यवस्तूनां मूल्यवृद्धिः, उत्तराषाढायां धान्यानां मूल्यवृद्धिः, श्रवणे तिल-तैल-तिलहनानां मूल्यवृद्धिश्च प्रतिपादिता। उत्तरभाद्रपदायां तण्डुलरजतकर्पूरखाण्डकार्पासमौक्तिकलवणादीनां मन्दी, फलमूलजन्यवस्तूनां मूल्यवृद्धिश्च वर्णिता। रेवत्यां सामान्यविपण्यां मन्दी तथा सुभिक्षस्य सम्भावना निर्दिष्टा ।

<u>अंशविपण्यया सह सम्भाव्यसम्बन्धः-</u> उपर्युक्तेषु ग्रन्थेष्वाधुनिक-शब्दप्रयोगेणांशविपण्याः प्रत्यक्षं विवेचनं सर्वत्र न दृश्यते तथापि वस्तुमूल्यपरिवर्तनस्य सामान्यसिद्धान्तान् आधुनिकवित्तीयक्षेत्रे तुलनात्मकतया परीक्षितुं शक्यते। यथा धातुमूल्यस्य वृद्धिः धातुसम्बद्धोद्योगानां व्यावसायिकस्थितिं प्रभावितुं शक्नोति, कार्पासस्य मूल्यपरिवर्तनं वस्त्रपरिधानोद्योगयोः व्ययसंरचनायां प्रभावं जनयितुं शक्नोति, तैलधान्यादीनां मूल्यवृद्धिः खाद्यप्रसंस्करणोपभोग्यवस्तुक्षेत्रयोः लाभांशान् प्रभावितुं शक्नोति। अतः ग्रहगोचर-फलानामाधुनिकांशविपण्यया सह सम्बन्धविचारः प्रत्यक्षफलादेशरूपेण नापितु परीक्षणीयपरिकल्पनारूपेण करणीयः। उदाहरणार्थं, यदा कस्यचित् नक्षत्रे ग्रहस्य सञ्चारसमये पारम्परिकग्रन्थः धातुमूल्यवृद्धिं निर्दिशति, तदा तस्मिन् कालखण्डे धातुसम्बद्धानां व्यावसायिकसंस्थानाम्(कम्पनीति) अंशमूल्यानि कथं परिवर्तन्ते इति परीक्षणं शक्यते। तथैव धान्यमूल्यह्रासस्य निर्देशः कृषिसम्बद्ध-कम्पनीनां लाभांशेषु किं प्रभावं जनयतीति परीक्षितुं शक्यते। निफ्टी-पञ्चाशत्-सूचकाङ्कस्याध्ययनमपि अत्रोपयोगि भवितुमर्हति। किन्तु निफ्टीपञ्चाशदिति विविधक्षेत्राणां प्रतिनिधित्वं कुर्वन् सूचकाङ्कः; अतः केवलं ग्रहस्थित्या तस्य समग्रगतिं व्याख्यातुं न शक्यते। व्यावसायिकसंस्थानां वित्तीयस्थितिः, लाभांश ऋणभारः नीतिपरिवर्तनं व्याजदरः मुद्रास्फीतिः वैश्विकघटनाः, विदेशीसंस्था-गतनिवेशः तथा निवेशकभावना इत्यादयः अनेके कारकाः अंशमूल्यानि प्रभावयन्ति।

आधुनिकवित्तीयगवेषणायामपि ज्योतिषीयमान्यतानां प्रभावः निवेशकाणां मनोवृत्तिमाध्यमेन विपण्यां प्रतिबिम्बितुं शक्नोतीति सम्भावना चर्चिता अस्ति। तथापि ज्योतिषीयकालगणनाधारित-निवेशरणनीतयः सर्वदा अतिरिक्तलाभं जनयन्तीति सिद्धं नास्ति। अतः पारम्परिकफलानां परीक्षणं निष्पक्षसांख्यिकीयपद्धत्या करणीयम् । अस्य विषयस्य वैज्ञानिकमूल्याङ्कनाय न्यूनातिन्यूनं

बहुवर्षीयं दैनिकमूल्यदत्तांशं सङ्ग्रहीतव्यम्। ग्रहाणां नक्षत्रप्रवेशकालः, नक्षत्रचरणम्, ग्रहवक्रत्वम्, ग्रहदृष्टिः तथा सम्बद्धवस्तूनां मूल्यपरिवर्तनानि पृथक् अभिलेखनीयानि। ततः निफ्टी-पञ्चाशत्-सूचकाङ्कस्य क्षेत्रीयसूचकाङ्कानां धातु-ऊर्जा-कृषिक्षेत्रसम्बद्धानामंशानां च प्रतिफलानि तुलनीयानि। परीक्षणे केवलं मूल्यवृद्धिमन्योरूल्लेखः पर्याप्तः न भवति। अपितु प्रतिफलस्य परिमाणं, संशयः, व्यापारपरिमाणम्, अस्थिरता, अन्यकारकाणां प्रभावः तथा परीक्षणस्य सांख्यिकीयमहत्त्वञ्च विचारणीयम्। यदा पारम्परिकफलनिर्देशः पूर्वमेव निश्चितस्स्यात्, तदा तस्यानुकूलानि तथा प्रतिकूलानि उभयविधानि परिणामानि समाननिष्पक्षतया परीक्षितव्यानि। एतेन पश्चाद्दृष्ट्या अनुकूलफलचयनस्य दोषः न्यूनीभवति।

अत्र विशेषतः अवधेयं यत् प्राचीनग्रन्थेषु वर्णितानि फलानि तत्तत्कालीनसामाजिक-आर्थिकपरिस्थितीनामाधारेण रचितानि। आधुनिकविपण्याः संरचना, व्यापारप्रणाली, मुद्रा-पूञ्जीप्रवाहः तथा वैश्विकसम्बन्धास्ततो भिन्नास्सन्ति। अतः प्राचीनफलानां आधुनिकविपण्यां यथावत् प्रयोगः सावधानतया एव करणीयः।

उपसंहारः - उपर्युक्तविवेचनात् स्पष्टं भवति यद्भारतीय-ज्योतिषशास्त्रे ग्रहनक्षत्रगोचरस्य माध्यमेन केवलं प्राकृतिक-घटनानामेव न, अपितु आर्थिकजीवनस्य विविधपक्षाणामपि विचारः कृतोऽस्ति। भौमबुधगुरुशुक्राणां नक्षत्रसञ्चारफलवर्णने धान्यधातु-कार्पासतैलघृतसुवर्णरजतादीनां मूल्यवृद्धिः, मूल्यह्रासः, स्थिरता तथा अस्थिरता च सूक्ष्मतया निरूपिताः सन्ति। एते निर्देशाः प्राचीनभारतीयार्थचिन्तनस्य तथा संहिताज्योतिषस्य महत्त्वपूर्णं पक्षं प्रकाशयन्ति। आधुनिकांशविपण्यया सहास्य विषयस्य सम्बन्धः शोधदृष्ट्या विचारणीयोऽस्ति। विशेषतः निफ्टी-पञ्चाशत्-सूचकाङ्कस्य तथा क्षेत्रविशेषसम्बद्धानाम् अंशानां दीर्घकालीन-दत्तांशाधारेण ग्रहगोचरफलानां परीक्षणं नूतनगवेषणायाः मार्गं प्रशस्तं कर्तुं शक्नोति। तथापि ग्रहस्थितिः अंशमूल्यानां निश्चितं कारणमिति प्रतिपादयितुं पर्याप्तं प्रमाणमद्याप्यपेक्षितम्। ज्योतिषीयमान्यताः, निवेशकानां सांस्कृतिकविश्वासाः, विपण्या-मनोविज्ञानं तथा वास्तविकार्थकारका इत्येतेषां परस्परसम्बन्धः पृथक्पृथक् परीक्षितव्यः।

अतोऽस्य विषयस्य समुचितं मूल्याङ्कनं नान्धस्वीकारेण सम्भवति, न च पूर्वाग्रहपूर्णनिराकरणेन। अपि तु शास्त्रीयग्रन्थानां निष्ठा-पूर्वकाध्ययनमाधुनिकवित्तीयदत्तांशानां निष्पक्षविश्लेषणम्, सांख्यि-कीयपरीक्षणन्तथा तर्कसम्मतविमर्श एतेषां समन्वयेन एव सम्भवति। परम्परागतज्ञानस्य संरक्षणं तस्य युक्तियुक्तपरीक्षणं तथा आधुनिकविज्ञानदृष्ट्या पुनर्व्याख्यानं चास्य शोधक्षेत्रस्य प्रमुखं प्रयोजनमस्तीति मे विश्वासः। निवेशविषये तु ग्रहगोचरविचारः स्वतन्त्रनिर्णायकः न, अपितु अधिकाधिकमैतिहासिकसांस्कृति-काध्ययनस्य विषय इति मर्यादा स्मर्तव्या।

सन्दर्भग्रन्थसूची-

१.शर्मा, हनुमानः. (टीकाकारः). (1986). वर्षप्रबोधः (हिन्दी-टीकासहितः). हेमराजः श्रीकृष्णदासप्रकाशनम्।

२.भविष्यफलभास्करः (हिन्दीटीकासहितः). (2005). हेमराजश्री-कृष्णदासप्रकाशनम्।

३.शास्त्री, सुदर्शनाचार्यः. (2024). तेजीमन्दीविज्ञानम्. चौखम्बा संस्कृत सीरीज ऑफिस।

४.मिश्रः, मुकुन्दवल्लभः. अर्घमार्तण्डः. मोतीलालबनारसीदासः।

५.Ratnaparkhi, V., & Sharma, P. (2010, 2017). शेयर बाज़ार एवं ज्योतिष. रुचिराज प्रकाशन।

सन्दर्भ

1. वर्षप्रबोधः, पृ० १०२, श्लोकः १४७
2. भविष्यफलभास्करः, पृ० ५४, श्लोकः १७
3. वर्षप्रबोधः, पृ० १०३, श्लोकः १५२
4. वर्षप्रबोधः, पृ० १०८, श्लोकः १७६
5. भविष्यफलभास्करः, पृ० ६५, श्लोकः १७
6. भविष्यफलभास्करः, पृ० ६५, श्लोकः १९
7. वर्षप्रबोधः, पृ० १३६, श्लोकः ३३१
8. वर्षप्रबोधः, पृ० १३७, श्लोकः ३३३